|| অথ ঋষভসূক্তম ||

ঋষভং মা সমানানাং সপত্নানাং ৱিষাসহিম | হংতাৰং শত্ৰূণাং কৃধি ৱিৰাজং গোপতিং গৱাম || ১ ||

অহমস্মি সপত্নহেংদ্ৰ ইৱাৰিষ্টো অক্ষতঃ | অধঃ সপত্না মে পদোৰিমে সৰ্ৱে অভিষ্ঠিতাঃ || ২ ||

অত্ৰৈৱ ৱোপি নহ্যাম্যুভে আৰ্ত্নী ইৱজ্যয়া | ৱাচস্পতে নি ষেধেমান য়থা মদধৰং ৱদান্ন || ৩ ||

অভিভূৰহমাগমং ৱিশ্ৱকৰ্মেণ ধাম্না | আ ৱশ্চিত্তমাৱো ৱ্ৰতমা ৱোহং সমিতিং দদে || ৪ ||

য়োগক্ষেমং ৱ আদায়াহং ভূয়াসমুত্তম আ ৱো মূৰ্ধানমক্ৰমীম | অধস্পদান্ম উদ্ৱদত মংডূকা ইৱোদকান্মংডূকা উদকাদিৱ || ৫ ||

|| ইতি ঋষভসূক্তম সংপূৰ্ণম ||